# श्रीमद्-भगवद्-गीता Śrīmad-Bha-ga-vad-Gīta

## Chapter 2 Verses 19 - 36

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्णपरमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne na-maḥ |
| श्रीमद्-भगवद्-गीता | śrīmad-bha-ga-vad-gī-tā |
| अथ द्वितीयोऽध्यायः । | a-tha dvi-tī-yo-'dhyā-yaḥ । |
| साङ्ख्ययोगः । | sāṅ-khya-yo-gaḥ। |

| | |
|---|---|
| य एनं वेत्ति हन्तारं | ya enaṁ vet-ti han-tā-raṁ |
| यश्चैनं मन्यते हतम् । | yaś-cai-naṁ manya-te ha-tam । |
| उभौ तौ न विजानीतः | u-bhau tau na vi-jā-nī-taḥ |
| नायं हन्ति न हन्यते ॥ १९ ॥ | nā-yaṁ han-ti na han-ya-te ॥ 19 ॥ |
| | |
| न जायते म्रियते वा कदाचित् | na jā-ya-te mri-ya-te vā ka-dā-cit |
| नायं भूत्वा भविता वा न भूयः । | nā-yaṁ bhūt-vā bha-vi-tā vā na bhū-yaḥ । |
| अजो नित्यः शाश्वतोऽयं पुराणः | ajo nit-yaḥ śāś-va-to'-yaṁ pu-rā-ṇaḥ |
| न हन्यते हन्यमाने शरीरे ॥ २० ॥ | na han-ya-te han-ya-mā-ne śa-rī-re ॥ 20 ॥ |
| | |
| वेदाविनाशिनं नित्यं | ve-dā-vi-nā-śi-naṁ nit-yaṁ |
| य एनमजमव्ययम् । | ya enam-ajam-av-ya-yam । |
| कथं स पुरुषः पार्थ | ka-thaṁ sa pu-ru-ṣaḥ pār-tha |
| कं घातयति हन्ति कम् ॥ २१ ॥ | kaṁ ghā-ta-ya-ti han-ti kam ॥ 21 ॥ |

| | |
|---|---|
| वासांसि जीर्णानि यथा विहाय | vā-sāṁ-si jīr-ṇā-ni ya-thā vi-hā-ya |
| नवानि गृह्णाति नरोऽपराणि । | na-vā-ni gṛh-ṇā-ti na-ro'-pa-rā-ṇi । |
| तथा शरीराणि विहाय जीर्णानि | ta-thā śa-rī-rā-ṇi vi-hā-ya jīr-ṇā-ni |
| अन्यानि संयाति नवानि देही ॥२२॥ | an-yā-ni saṁ-yā-ti na-vā-ni de-hī ॥ 22 ॥ |
| | |
| नैनं छिन्दन्ति शस्त्राणि | nai-naṁ chin-dan-ti śas-trā-ṇi |
| नैनं दहति पावकः । | nai-naṁ da-ha-ti pā-va-kaḥ । |
| न चैनं क्लेदयन्त्यापः | na cai-naṁ kle-da-yant-yā-paḥ |
| न शोषयति मारुतः ॥ २३ ॥ | na śo-ṣa-ya-ti mā-ru-taḥ ॥ 23 ॥ |
| | |
| अच्छेद्योऽयमदाह्योऽयम् | ac-ched-yo'-ya-ma-dāh-yo'-yam |
| अक्लेद्योऽशोष्य एव च । | akled-yo'-śoṣ-ya eva ca । |
| नित्यः सर्वगतः स्थाणुः | nit-yaḥ sar-va-ga-taḥ sthā-ṇuḥ |
| अचलोऽयं सनातनः ॥ २४ ॥ | aca-lo'-yaṁ sa-nā-ta-naḥ ॥ 24 ॥ |

अव्यक्तोऽयमचिन्त्योऽयम्	av-yak-to'-yam-acint-yo'-yam

अविकार्योऽयमुच्यते ।	avi-kār-yo'-yam-uc-ya-te ।

तस्मादेवं विदित्वैनं	tasmād-evaṁ vi-dit-vai-naṁ

नानुशोचितुमर्हसि ॥ २५ ॥	nā-nu-śo-ci-tum-ar-ha-si ॥ 25 ॥

अथ चैनं नित्यजातं	a-tha cai-naṃ nit-ya-jā-taṃ

नित्यं वा मन्यसे मृतम् ।	nit-yaṃ vā manya-se mṛ-tam ।

तथापि त्वं महाबाहो	ta-thā-pi tvaṃ ma-hā-bā-ho

नैवं शोचितुमर्हसि ॥ २६ ॥	nai-vaṃ śo-ci-tum-ar-ha-si ॥ 26 ॥

जातस्य हि ध्रुवो मृत्युः	jā-tas-ya hi dhru-vo mṛt-yuḥ

ध्रुवं जन्म मृतस्य च ।	dhru-vaṃ jan-ma mṛt-asya ca ।

तस्मादपरिहार्येऽर्थे	tas-mā-da-pa-ri-hār-ye'r-the

न त्वं शोचितुमर्हसि ॥ २७ ॥	na tvaṃ śo-ci-tum-ar-ha-si ॥ 27 ॥

| | |
|---|---|
| अव्यक्तादीनि भूतानि | av-yak-tā-dī-ni bhū-tā-ni |
| व्यक्तमध्यानि भारत । | vyak-ta-madh-yā-ni bhā-ra-ta । |
| अव्यक्तनिधनान्येव | av-yak-ta-ni-dha-nān-ye-va |
| तत्र का परिदेवना ॥ २८ ॥ | tat-ra kā pari-de-va-nā ॥ 28 ॥ |
| | |
| आश्चर्यवत्पश्यति कश्चिदेनम् | āś-carya-vat-paś-ya-ti kaś-ci-de-nam |
| आश्चर्यवद्वदति तथैव चान्यः । | āś-carya-vad-va-da-ti ta-thai-va cān-yaḥ । |
| आश्चर्यवच्चैनमन्यः शृणोति | āś-carya-vac-cai-nam-an-yaḥ śṛ-ṇo-ti |
| श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥ | śrut-vāp-ye-naṃ veda na ca-iva kaś-cit ॥ 29 ॥ |
| | |
| देही नित्यमवध्योऽयं | de-hī nit-yam-avadh-yo'yaṃ |
| देहे सर्वस्य भारत । | de-he sar-vas-ya bhā-ra-ta । |
| तस्मात्सर्वाणि भूतानि | tas-māt-sar-vā-ṇi bhū-tā-ni |
| न त्वं शोचितुमर्हसि ॥ ३० ॥ | na tvaṃ śo-ci-tum-ar-ha-si ॥ 30 ॥ |

स्वधर्ममपि चावेक्ष्य sva-dhar-ma-ma-pi cā-vekṣ-ya

न विकम्पितुमर्हसि । na vi-kam-pi-tum-ar-ha-si ।

धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् dharm-yād-dhi yud-dhāc-chre-yo'n-yat

क्षत्रियस्य न विद्यते ॥ ३१॥ kṣat-ri-yas-ya na vid-ya-te ॥ 31 ॥

यदृच्छया चोपपन्नं ya-dṛc-cha-yā co-pa-pan-naṃ

स्वर्गद्वारमपावृतम् । svar-ga-dvā-ram-apā-vṛ-tam ।

सुखिनः क्षत्रियाः पार्थ su-khi-naḥ kṣat-ri-yāḥ pār-tha

लभन्ते युद्धमीदृशम् ॥ ३२॥ la-bhan-te yud-dham-ī-dṛ-śam ॥ 32 ॥

अथ चेत्त्वमिमं धर्म्यं a-tha cet-tvam-imaṃ dharm-yaṃ

सङ्ग्रामं न करिष्यसि । saṅ-grā-maṃ na ka-riṣ-ya-si ।

ततः स्वधर्मं कीर्तिं च ta-taḥ sva-dhar-maṃ kīr-tiṃ ca

हित्वा पापमवाप्स्यसि ॥ ३३॥ hit-vā pā-pam-avāps-ya-si ॥ 33 ॥

| | |
|---|---|
| अकीर्तिं चापि भूतानि | a-kīr-tiṃ cā-pi bhū-tāni |
| कथयिष्यन्ति तेऽव्ययाम् । | ka-tha-yiṣ-yan-ti te'v-ya-yām । |
| सम्भावितस्य चाकीर्तिः | sam-bhā-vi-tas-ya cā-kīr-tiḥ |
| मरणादतिरिच्यते ॥ ३४॥ | ma-ra-ṇād-ati-ric-ya-te ॥ 34 ॥ |
| | |
| भयाद्रणादुपरतं | bha-yād-ra-ṇād-upa-ra-taṃ |
| मंस्यन्ते त्वां महारथाः । | mans-yante tvāṃ ma-hā-ra-thāḥ । |
| येषां च त्वं बहुमतः | ye-ṣāṃ ca tvaṃ ba-hu-ma-taḥ |
| भूत्वा यास्यसि लाघवम् ॥ ३५॥ | bhūt-vā yās-ya-si lā-gha-vam ॥ 35 ॥ |
| | |
| अवाच्यवादांश्च बहून् | avāc-ya-vā-dāṃś-ca ba-hūn |
| वदिष्यन्ति तवाहिताः । | va-diṣ-yan-ti ta-vā-hi-tāḥ । |
| निन्दन्तस्तव सामर्थ्यं | nin-dan-tas-ta-va sā-marth-yaṃ |
| ततो दुःखतरं नु किम् ॥ ३६॥ | ta-to duḥ-kha-ta-raṃ nu kim ॥ 36 ॥ |

| | |
|---|---|
| ॐ तत्सत् | om tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्मविद्यायाम् | brahma-vid-yā-yām |
| योगशास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुनसंवादे | śrī-kṛṣ-ṇār-juna-saṃ-vā-de |
| साङ्ख्य योगो नाम | sāṅ-khya yo-go nā-ma |
| द्वितीयोऽध्यायः । | dvi-tī-yo-'dhyā-yaḥ । |
| ॐ हरिः ॐ। | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī guru-bhyo namaḥ |
| हरिः ॐ । | hariḥ om । |

| | |
|---|---|
| सर्वधर्मान्परित्यज्य | sar-va-dhar-mān-pari-tyaj-ya |
| मामेकं शरणं व्रज । | mām-ekaṃ śara-ṇaṃ vra-ja । |
| अहं त्वा सर्वपापेभ्यः | ahaṃ tvā sar-va-pā-pebh-yaḥ |
| मोक्षयिष्यामि मा शुचः ॥ १८-६६ ॥ | mokṣa-yiṣ-yā-mi mā śu-caḥ ॥ 18-66 ॥ |

## श्री कृष्णार्पणमस्तु

## śrī kṛṣ-ṇār-pa-ṇam-astu

